# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः

## देवासमार्गः,उज्ज्रयिनी (म.प्र.)

# स्नातकपाठ्यक्रमः

## बीएसंस्कृतप्राच्यवार्षिकपरीक्षा

प्रथम / द्वितीय / तृतीयवर्षस्य पाठ्यक्रमः

### नियमितच्छात्राणां कृते

सत्रम्

2017-18

2018-19

2019-20


**महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः**

**देवासमार्गः,उज्ज्रयिनी (म.प्र.) 456010**

दूरभाषः- (0734) 2526044, दूरप्रेषः- (0734) 2524845

अणुसङ्केतः - regpsvvmp@rediffmail.com,अन्तर्जालपुटम्- www.mpsvvujjain.org

# महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः,उज्जयिनी (म.प्र.)

## बीए संस्कृतप्राच्य-वार्षिकपरीक्षापाठ्यक्रमः

## नियमावलिः

### 1- पाठ्यक्रमस्वरूपम् -

1. बी.ए. संस्कृतप्राच्यपरीक्षायाः पाठ्यक्रमः त्रिवर्षीयः विद्यते। तत्र प्रतिवर्षं नव प्रश्नपत्राणि 50–50 अङ्कानां सन्ति।
2. प्रथमद्वितीयतृतीयप्रश्नपत्रेषु : मध्यप्रदेशस्य उच्चशिक्षाविभागद्वारा निर्धारितः आधारपाठ्यक्रमः अनिवार्यतया पठनीयो भविष्यति।
3. चतुर्थप्रश्नपत्रं (सामान्यसंस्कृतम्) अथ च पञ्चम–षष्ठ–सप्तम–प्रश्नपत्राणि (विशिष्टसंस्कृतम्) सर्वेरपि अनिवार्यतया पठनीयानि भविष्यन्ति।
4. अष्टमं नवमं च प्रश्नपत्रम् वैकल्पिकविषयसम्बद्धम्। तत्र प्रवेशार्थी हिन्दीसाहित्य–अंग्रेजी–साहित्य–अर्थशास्त्र–समाजशास्त्र–इतिहास–राजनीतिविज्ञानविषयेषु कमप्येकं स्वीकर्तुं शक्नोति।

### 2- प्रवेशनियमाः -

बी.ए. संस्कृतप्राच्यपरीक्षायां वक्ष्यमाणपरीक्षोत्तीर्णः प्रवेशमर्हति –

(1) मध्यप्रदेशस्थ – महर्षिपतञ्जलिसंस्कृतसंस्थानस्य उत्तरमध्यमापरीक्षोत्तीर्णः अथवा भारतस्य कस्यापि प्रादेशिकशासनस्य शिक्षाविभागद्वारा प्राप्तमान्यताकसंस्थायाः विश्वविद्यालयस्य वा तत्समकक्षपरीक्षोत्तीर्णः।

(2) मध्यप्रदेशस्थ–माध्यमिकशिक्षामण्डलस्य उच्चतरमाध्यमिक (इण्टर मीडियट) परीक्षोत्तीर्णः, अथवा भारतस्य कस्यापि प्रादेशिकशासनस्य शिक्षाविभागद्वारा प्राप्तमान्यताकसंस्थायाः संस्कृतेन सह तत्समकक्षपरीक्षोत्तीर्णः प्रवेशसमितेरनुशंसया प्रवेशार्हः।

(3) बी.ए. संस्कृतप्राच्यपरीक्षायां स्ववर्गीयविषयपाठ्यक्रमे राजनीतिविज्ञानम्, अर्थशास्त्रम्, इतिहासः हिन्दीसाहित्यम्, अंग्रेजीसाहित्यम्, समाजशास्त्रम् च विषयाः स्वीकृताः सन्ति। प्रवेशार्थी छात्रः उक्तेषु कमप्येकं विषयं स्वीकर्तुं शक्नोति।

अध्यक्ष
विश्वविद्यालय अध्यापन विभाग
महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन

## नियमितच्छात्राणां कृते बी.ए. संस्कृतप्राच्यपरीक्षापाठ्यक्रमस्वरूपम्

| प्रश्नपत्रम् | विषयः | आन्तरिक मूल्यांकनम् | बाह्य परीक्षा (सैद्धांतिक) | पूर्णांकाः | उत्तीर्णांकाः | | |
|---|---|---|---|---|---|---|---|
| | | | | | आन्तरिक मूल्यांकनम् | बाह्य परीक्षा (सैद्धांतिकम्) | योगः |
| प्रथमम् | आधारपाठ्यक्रमः | 10 | 40 | 50 | 03 | 14 | 17 |
| द्वितीयम् | आधारपाठ्यक्रमः | 10 | 40 | 50 | 03 | 14 | 17 |
| तृतीयम् | आधारपाठ्यक्रमः | 10 | 40 | 50 | 03 | 14 | 17 |
| चतुर्थम् | सामान्यसंस्कृतम् | 10 | 40 | 50 | 03 | 14 | 17 |
| पञ्चमम् | विशिष्टसंस्कृतम् प्रथमम् | 10 | 40 | 50 | 03 | 14 | 17 |
| षष्ठम् | विशिष्टसंस्कृतम् द्वितीयम् | 10 | 40 | 50 | 03 | 14 | 17 |
| सप्तमम् | विशिष्टसंस्कृतम् तृतीयम् | 10 | 40 | 50 | 03 | 14 | 17 |
| अष्टमम् | स्ववर्गीयः विषयः हिन्दीसाहित्यम् अङ्ग्रेजी साहित्यम् अर्थशास्त्रम् समाजशास्त्रम् राजनीतिविज्ञानम् इतिहासः | 10 | 40 | 50 | 03 | 14 | 17 |
| नवमम् | स्ववर्गीयः विषयः हिन्दीसाहित्यम् अङ्ग्रेजी साहित्यम् अर्थशास्त्रम् समाजशास्त्रम् राजनीतिविज्ञानम् इतिहासः | 10 | 40 | 50 | 03 | 14 | 17 |
| योगः | ------------------ | 90 | 360 | 450 | 27 | 126 | 153 |

### 3. परीक्षायोजना -

- बी.ए. संस्कृतप्राच्यपरीक्षायाः चतुर्थ–पञ्चम–षष्ठसप्तमप्रश्नपत्राणां माध्यमं संस्कृतं भविष्यति।
- बी.ए. संस्कृतप्राच्यपरीक्षायां प्रतिवर्षं सत्रार्द्धे उत्तीर्णतायै 33% अङ्काः निर्धारिताः। श्रेणीनिर्धारणं षष्ठसत्रार्द्धे परीक्षान्ते भविष्यति।
- बी.ए. संस्कृतप्राच्यप्रथमद्वितीयतृतीयवर्षपरीक्षासु ( तृतीयवर्षे)
  उत्तीर्णतार्थं समष्टिरूपेण 33 प्रतिशतं, प्रतिपत्रं च 20 प्रतिशतमङ्काः अपेक्षिताः।
- आन्तरिकमूल्याङ्कने सैद्धान्तिकपरीक्षायां च पृथक्–पृथक् उत्तीर्णता आवश्यकी।
- कवर्गीय विषयेषु समष्टिरूपेण 33 प्रतिशतमङ्काः अनिवार्याः।
- आन्तरिकमूल्याङ्कने उत्तीर्णः एव सैद्धान्तिकपरीक्षायां सम्मेलितुमर्हः।

अध्यक्ष
विश्वविद्यालय अध्यापन विभाग
महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन

## 4. प्रश्नपत्रनिर्माणयोजना -

सामान्यतया प्रतिप्रश्नपत्रं निम्नानुसारं त्रिविधाः प्रश्नाः भविष्यन्ति। तत्र प्रतिप्रश्नं एको विकल्पोऽनिवार्यः।

अंकविभाजनम्

प्रत्येकमेककतः अधोलिखितव्यवस्थानुसारं प्रश्नाः भवेयुः –

| | | |
|---|---|---|
| 1 | बहुविकल्पीयप्रश्नाः | 1 x 5 = 5 |
| 2 | लघूत्तरीयप्रश्नाः | 3 x 5 = 15 |
| 3 | दीर्घोत्तरीयप्रश्नाः | 4x 5 = 20 |
| | आन्तरिकमूल्यांकनम् | =10 |

## 5. श्रेणिनिर्धारणम् -

बी.ए.संस्कृतप्राच्यपरीक्षायां त्रिष्वपि वर्षेषु प्राप्ताङ्कानां योगाधारेण निम्नलिखितरूपेण श्रेणिनिर्धारणं भविष्यति :–

- 60 प्रतिशतम्, ततो वा अधिकाङ्कानां च प्राप्त्या प्रथमश्रेणिनिर्धारणम्।
- 45 प्रतिशतम् ततो वा अधिकाङ्कानां किन्तु 60 प्रतिशतमङ्केभ्यो न्यूनाङ्कानां प्राप्त्या च द्वितीयश्रेणिनिर्धारणम्।
- 33 प्रतिशतम् ततो वा अधिकाङ्कानां किन्तु 45 प्रतिशतमङ्केभ्यो न्यूनाङ्कानां प्राप्त्या च तृतीयश्रेणिनिर्धारणम्।

अध्यक्ष
विश्वविद्यालय अध्यापन विभाग
महर्षि पाणिनि संस्कृत एवं वैदिक विश्वविद्यालय, उज्जैन